**दिनाङ्कः-03.10.2023**

**प्रातः - 06:55**

## प्रधानमंत्री

प्रधानमंत्री नरेन्द्रमोदी मध्यप्रदेशस्य ग्वालियर-नगरे जनसभां सम्बोधितवान्। विकास-कार्याणां च उद्घाटनं कृतवान्। तेन प्रोक्तं यत् कोऽपि सर्वकार: एकस्मिन् वर्षे यावत् कार्यं करोति तावत् अस्माकं प्रशासनेन एकस्मिन्नेव दिने कृतम्। प्रधानमंत्री प्रोक्तवान् यत् इन्दौर-उज्जैन नगरयो: नवाचार-औद्योगिक-प्रभागै: युवभ्य: सहस्राधिका: वृत्यवसरा: उद्घाटिता: भविष्यन्ति। इत: पूर्वं प्रधानमन्त्रिणा राजस्थानस्य चित्तौड़गढे सप्तसहस्र-कोटि-रूप्यकाणां विभिन्ना: विकासात्मक-परियोजना: राष्ट्राय समर्पिता शिलान्यासं च कृतम्। कार्यक्रमं सम्बोधयन् असौ प्रावोचत् यत् निम्न-क्षेत्राणां विकास: तस्य प्रशासनस्य प्राथमिकता वर्तते।

## जितेन्द्र-इसरो

केन्द्रीय-विज्ञान-प्रौद्योगिकीय-राज्य-मन्त्रिणाडॉ.जितेन्द्र सिंह: कथितवान् यत् अन्तरिक्षानुसन्धाने भारतं प्रतिदिनं संवर्धति सम्प्रति च अन्तरिक्षस्य कुलीन वर्गै: सह प्रतिस्पर्धां अपि करोति। ह्य: नवदिल्ल्यां एकस्मिन् कार्यक्रमे भारतीय-अन्तरिक्ष-अनुसन्धान-संघटनस्य वैज्ञानिकेभ्य: सम्मानं प्रददन् डॉ.सिंह: समुदीरितवान् यत् इसरो इति सम्प्रति विश्वस्य अग्रगण्य-अन्तरिक्ष-संघटनेषु एको वर्तते। असौ प्रावोचत् यत् अमेरिका-रूस देशौ भारतं निम्नदृष्ट्या अवलोकयत: आस्ताम् सम्प्रति सहभागितां इच्छत:। सभां सम्बोधयन् प्रोदीरितवान् यत् भारतं विज्ञान-प्रौद्योगिकी-क्षेत्रयो: नेतृत्वाय समर्पित जनानां संघटनानाञ्च सहयोगस्य आवश्यकता वर्तते।

## नोबल-औषधि:

चिकित्साक्षेत्रे उतवा शरीर-विज्ञान-क्षेत्रे अस्य वर्षस्य नोबेल-पुरस्कार: संयुक्त-रूपेण हंगरीनगरस्य अमरीकीय-प्राध्यापकाय कैटलिन कारिको इत्यस्मै अमेरिकायाश्च प्राध्यापकाय ड्रीयू-वीजमैन इत्यस्मै प्रदास्यते। उभौ वैज्ञानिकौ एतादृशीं प्रौद्योगिकीं विकसितां कृतवन्तौ यथा एम्-आर् एन् ए इत्यस्मिन् आधरितानां कोविड-सूच्यौषधानां निर्माणं भवितुं शक्यते। उभौ वैज्ञानिकौ दीर्घकालादेव पेंसिलवेनिया-विश्वविद्यालये कार्यरतौ स्त:। स्वीयानुसन्धानाय एकविंशत्यधिक द्विसहस्रतमे वर्षे प्रतिष्ठितं लास्कर-पुरस्कारं समेत्य अनेके पुरस्कारा: अपि तौ स्वीकृतवन्तौ। नोबेल-पुरस्कार-समिति: प्रख्यापितवती यत् आधुनिकसमये मानव-स्वास्थ्याय वैज्ञानिकयो: योगदानं महत्वपूर्णं अस्ति।

## मुंबई-खादी-महोत्सव:

केन्द्रीय-सूक्ष्म-लघु-मध्यम-उद्यम-विभागमन्त्री नारायणराणे ह्य: मुम्बय्यां-खादी-ग्रामोद्योगेन आयोजितस्य खादी महोत्सवस्य उद्घाटनं कृतवान्। सभां सम्बोधन् नारायणराणे: खादी-ग्रामोद्योगेन विहितानां कार्याणां प्रशंसां सहैव साम्प्रतिकेषु वर्षेषु उल्लेखनीय-वृद्धेरपि चर्चां कृतवान्। अयं खादी महोत्सव: एकत्रिंशत् दिनांकं यावत् प्रचलिष्यति। एतस्मिन् उत्सवे न केवलं खादी-उत्पादानां प्रदर्शनं भविष्यति अपितु दैशिक उत्पादानां प्रचाराय **वोकल फॉर लोकल** इत्यस्य प्रदर्शनी अपि भविष्यति।

## ऋतु-विज्ञान

भारतीय-ऋतु-विज्ञान-विभागेन आगामि द्विदिवसयो: बिहार-झारखण्ड-उपहिमालय-पश्चिम-बंग-सिक्किम उत्तर ओडिशा-उत्तर छत्तीसगढ-राज्येषु अतिवृष्टे: आशंका प्रख्यापिता विभागनुसारि दक्षिण पश्चिम-झारखण्डराज्ये छत्तीसगढराज्ये च अल्प-वृष्टि: भविष्यति। मध्य महाराष्ट्रे मराठावाड क्षेत्रे अपि मेघाच्छादित-ध्वनिना सह अल्पवृष्टि:भविष्यति।

**।। इति वार्ता: ।।**